topic 8।

# क्विन् प्रत्ययान्त हलन्त पुँल्लिंग शब्द।

ऋत्विग्-दधृक्-स्रग्-दिग्-उष्णिग् अञ्चु-युजि-क्रुञ्चां च।

एभ्यः क्विन् स्यात्, अञ्चेः सुप्युपपदे। युजिक्रुञ्चोः केवलयोः। क्रुञ्चेर्नलोपाभावश्च निपात्यते। कनावितौ।

कृदतिङ्।

अत्र धात्वधिकारे तिङ्-भिन्नः प्रत्ययः कृत्सञ्ज्ञः स्यात्।

वेरपृक्तस्य।

अपृक्तस्य वस्य लोपः।

क्विन्प्रत्ययस्य कुः।

क्विन् प्रत्ययो यस्मात् तस्य कवर्गोऽन्तादेशः स्यात् पदान्ते। अस्यासिद्धत्वात् चोः कुः इति कुत्वम्। ऋत्विक्, ऋत्विग्। ऋत्विजौ। ऋत्विग्भ्याम्।

युजेरसमासे।

युजेः सर्वनामस्थाने नुम् स्यात् असमासे। संयोगान्तलोपः। कुत्वेन नस्य ङः - युङ्। अनुस्वारपरसवर्णौ - युञ्जौ। युञ्जः। युग्भ्याम्।

चोः कुः।

चवर्गस्य कवर्गः स्यात् झलि पदान्ते च। सुयुक्, सुयुग्। सुयुजौ। सुयुग्भ्याम्। खन्। खञ्जौ। खन्भ्याम्।

व्रश्च - भ्रस्ज - सृज - मृज - यज - राज - भ्राज - च्छशां षः ।

झलि पदान्ते च । जश्त्व - चर्त्वे - राट्, राड् । राजौ । राजः । राड्भ्याम् । एवम् - विभ्राट्, देवेट्, विश्वसृट् ।

वा - परौ व्रजे षः पदान्ते ।

परावुपपदे व्रजेः क्विप् स्यात् दीर्घश्च, पदान्ते षत्वमपि । परिव्राट् । परिव्राजौ ।

विश्वस्य वसुराटोः ।

विश्वशब्दस्य दीर्घोऽन्तादेशः स्याद् वसौ राट्शब्दे च परे । विश्वाराट्, विश्वाराड् । विश्वराजौ । विश्वाराड्भ्याम् ।

स्कोः संयोगाद्योरन्ते च ।

पदान्ते झलि च यः संयोगस्तदाद्योः स्कोर्लोपः । भृट्, भृड् । सस्य श्चुत्वेन शः । झलां जश् झशि । इति शस्य जः । भृज्जौ । भृड्भ्याम् । त्यदाद्यत्वम् पररूपत्वम् ।